© 2017 IJSRSET | Volume 3 | Issue 8 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099

# काव्यशास्त्रेषु गुण विवेचनम्



**डॉ0 अरविन्द कुमार सिंह**
**अतिथि प्रवक्ता**
**संस्कृत विभाग**
**ईश्वर शरण डिग्री कालेज,**
**इलाहाबाद**

यथा जीवात्मन उत्कर्षजनक आत्मनिष्ठः कश्चित् धर्मविशेष एव, तथैव काव्यपुरुषस्य नानाविधासाधारणगुणक्रिया एवं शौर्यव्यंजकास्तथा कठोरवर्णाः भिन्नाः सुकुमारवर्णा एव रसनिष्ठमाधुर्यव्यंजका भवन्ति।

काव्यपुरुषस्यात्मा रसः, शब्दार्थौ अंगभूतौ शरीरभूतावित्यवसीयते। आत्मनः जीवात्मनो यथा शौर्यादयो धर्माः नाचेतनस्य शरीरस्य तथा काव्यात्मनो रसस्य ये धर्मास्ते गुणाः। अर्थाद् रसस्य धर्माः गुणा इति फलितम्। परमिदं लक्षणं रसधर्मेषु रसत्वे रसदोषेषु स्थायिषु चातिव्याप्तम्। अतस्तन्निाराकृतये 'उत्कर्षकः' इति विशेषणम्। एवं रसधर्मत्वे सति रसोत्कर्षकत्वं गुणत्वमिति फलितम्। अतएव मम्मटाचार्यः काव्यात्मनो रसस्योत्कर्षाधायकान् गुणान् निरुपयन्नाह–

**ये रसस्यागिंनो धर्मा शौर्यादय इवात्मनः।**

**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणा।।**[1]

तेन अचलस्थितयः इत्यपि विशेषणं दत्तम्। तेनाचलस नियत स्थितिर्चेषां ते अचलस्थितयः अव्यभिचारिस्थितय इति।

अत :

(1) रसोत्कर्षकत्वे सति रसधर्मत्वम्।

(2) रसोत्कर्षकत्वे सति रसाव्यभिचारिस्थितिव्यम्।

(3) नियमेन रसोपकारकत्वम्।

इति लक्षणत्रयं फलितम्। अतो निरसेष्वपि सत्स्वलवंडारेषु नातिव्याप्तिः।

इमे गुणाः शव्दार्थरचनाधर्माः न सन्ति। रसविरूद्धवर्णररचनादिभिरूक्तश्चित्तवृत्तयो न जायन्ते। रसानुकुलवर्णरचनादिभिरेव जायन्ते। अतो रसस्य धर्म इति। एवं सति शब्दों मधुरः, रचना मधुरेत्यादिव्यहारो भाक्तः।

काव्ये गुणानामचलस्थितिः वर्त्तते। वामनेनाप्युक्तम्–

**युवतेरिव रुपमंगकाव्यं स्वदते शुद्धगुणं तदप्यतीव।**

**विहितप्रणयं निरन्तराभिः सदलंकारविकल्पकल्पनाभिः।।**[2]

अच्चुतरायश्च–

**अलंकारविहीनोऽपि सुदृक् सौभाग्यकृद्गुणः।**

**गुणहीनमूलंकारसहस्रमपि किं तथा।।**

**अललंकाराः गुणोष्वेव ग्रथ्यन्ते प्रायशो भुवि।**

**गुणाभ्योऽणेः पृथक्त्वेन प्रगल्भानां न तद्ग्रहः।।**

गुणविषये प्रायो मम्मटाचार्यमेवानुसरित कविकर्णपूरः।

नन्वनुमानादेव शौर्यमपि देहधर्म एव भवत्वित्याह न ह्ययमाकारः शूरः स्थूलत्वादिति सद्धेतुः, अस्थूलस्यापि शूरत्वदर्शनात्। यथा महामतंगजपंचाननयोः। यतोऽथूलस्य सिंहस्य शौर्यम्, तथा स्थूलस्य मतंगजस्य न सिंहवत् शौर्यम्। वीरं सूते इति वीरसूस्तस्याः पुत्रयोः शिशुयूनोर्मध्ये शिशोरपेक्षया युवा शूर इत्यत्र यद् देहगतं शूरत्वम्, ततु वयः कृतमेव न तु गुणकृतमित्यो निर्गुणकृतशौर्यमेवात्र दृष्टान्तो बोध्यः। तेन स्थूलत्वरूपहेतोर्व्यभिचारदोषात् स शौर्यादिगुणो देहस्य न भवति। तस्यः शौर्यस्य नानाविधगुणक्रियाविशिष्ट आकारो व्यंजकः। तथैव रमस्य व्यंजकः आकारः शरीरभूतशब्दार्थौ, शब्दः वर्णमयः तस्मादेवोक्तम् गुणस्य व्यंजकाः वर्णाः इति।

अतः कविकर्णपूरमते रसोत्कर्षजनकतावच्छेदकधर्मत्वं गुणात्वमिति गुणस्य लक्षणं फलितम्।

न च 'गोपिभिः सह विहरति कृष्णः' इत्यत्र श्रृंगाररसात्मकं वर्तते, न तत्र काव्यत्वव्यवहारः। अतोऽपि व्यभिचारात् कथं रसात्मकस्य हेतुत्वमिति वाच्यम् यत्रोऽत्र हेतौ काव्यत्व जातिमत्त्वे इति विशेषणं देयम्, तथा च काव्यत्वजातिमत्वे सति रसात्मकत्वादिति हेतुप्रयोगो ज्ञेयः। 'गोपिभिः सह विहरति' इत्यत्र काव्यत्वजातेरभावादेव न व्यभिचार इति।

तयोर्देहरूपयोः शब्दार्थयोरपकर्षकत्वमस्तु, यन्मूलारपकर्षकत्वामूला तेषां श्रुतिकट्व पुष्टार्थादीनां दोषता तथा च रसापकर्षकत्वं दोषत्वमिति दोषलक्षणत्वातेषां रसापकर्षकत्वाभावेन मास्तु दोषत्वमिति पूर्वपक्षः। ननु सुकुमारत्वं यदि कोमलत्वमुच्यते, तदा वर्णनिष्ठकोमलत्वं शिथिलत्वमेव भविष्यति, तत्तु कठोरवर्णाभिन्नो सर्वत्रैव वर्त्तते। एवं चेद् यत्र कवितायां सकारबाहुल्यमात्रम्, तत्र मार्धुर्यं नास्ति, किन्तु भवन्मते माधुर्यव्यंजका बहुतरजकारघटितकोमलवर्णा वर्त्तन्ते। इत्यतो सुकुमारत्वं न कोमलत्वम्, तस्य कोमलत्वस्य शिथिलत्वरूपत्वात्। अत्र प्राचीनानां सम्मति प्रस्तौति–सुकुमारत्वं रंजकत्वम् यथा 'शिथिलं मालतोमाला लोलालिकलिता यथा' इत्याचार्यदण्डिनः।[3]

यथा लोलालिभिः कलिता युक्ता मालतीमालेत्यत्र दण्डिनोक्तपद्ये माधुर्याभावेऽपि कोमलवर्णा वर्त्तन्ते, एवमत्रापि श्रृंगार वर्णनप्रसंगे। ललनाया उत्कृष्टमुकुटमणि श्रीराधिका सखिभिः सह लघुलघु यथा स्यातथा विलसतीत्यत्र माधुर्याभावेऽपि बहुतरलकारघटितकोमलवर्णा वर्तन्ते। रंजकत्वं नाम चेतस1मत्कारकारितत्वम्। यथाऽद्भतुवस्तुदर्शने सति नेत्रस्यस्फारताजनकचमत्कारो जायते, तथैवाद्भुसुकुमारवर्णानां श्रवणे सति चित्तस्य स्फारताजनकचमत्कारो भवति।

आचार्यवामनस्य मते माधुर्याद्या गुणाः काव्यपुरुषस्य शोभाकर्तारः। अलंकारास्तदुत्कर्षहेतवः तन्मतं दूषयितुमुत्थापयति यदुक्तमन्यैः–

**कर्त्तारः काव्यशोभाया धर्मा एव गुणाः स्मृताः।**

**अलंकारास्तदुत्कर्षहेतवः स्युरिति क्रमः।।**

एतन्मतं दूषयति एतद्यदुक्तम्, तदपि नातिललितम्। यतो हि गुणालंकारविशिष्टस्यैव तन्मते काव्यत्ववंगीकारे गुणालंकारावपि काव्यपुरुषान्तर्भूतावेव, तत्कथं गुणस्य काव्यशोभाकरत्वम्, कथं वालंकारस्य काव्योत्कर्षकत्त्वम्।

स्वस्य शोभाजनकत्वाद्यभावात्, दोषान्तरमपि उत्थापयति अथैकस्य काव्यपुरुषस्य सर्वे गुणाः एवं शोभाकर्तारो नान्ये, किं वा गुणजन्यशोभां प्रति रीतेः कारणत्वमिति पृथक् पृथक् कारणमिति पक्षद्वयं क्रमेण दूषयति। गुणाभिन्नयोः पांचालीगौणीस्वरूपरीत्योः काव्यशोभाकरत्वानुपपत्तिः। नापि द्वितीयपक्षः– पांचाल्यादीनां पृथक् शोभाजनकत्ववंगीकारे पांचाल्यादीनामपि गुणत्वापतिः, यदि तत्र गुणत्ववारणाय पांचाल्यादीनामपि गुणत्वापत्तिः। यदि तत्र गुणत्ववारणाय पांचाल्यादिरीतिभिन्नत्वे सति काव्यशोभाकरत्वं गुणत्वमित्युच्यते 'ऊर्ज्जत् स्फूर्जद् गर्जनैः' इत्यादौ ओजोरूपगुणे अव्याप्तिस्तत्र काव्यशोभाजनकःत्वाभावात्, माधुर्यप्रसादगुणयोरेव काव्यशोभाजनकत्वम्, न तु ओजोगुणस्येति ज्ञेयम्।

## गुणस्य व्यंजव्यकत्वनिर्धारणम्

ननु गुणानां रसधर्मत्वे कथं तत्ववेदिनां शब्दार्थयोर्मधुरादिव्यवहारः आत्मगुणानां शौर्यादीनां स्थूलशरीरे इव तेषां रसवृत्तीनां माधुर्यौजः प्रसादारख्यानां गुणानां व्यंजकेषु सुकुमारादिवर्णेषु, अर्थेषु रचनासु च गौणप्रयोगः। शब्दार्थरचनानां नानात्वाद्रसनिष्ठमेव। स्वव्यंगजकतादिसम्बन्धेन लक्षणया। मधुरः शब्दः, मधुरोऽर्थ इति व्यवहारः।

माधुर्यादीनां गुणानामभिव्यंजकाः के इत्याकाङ्क्षायां कथयति कर्णपूरः–

**'गुणस्य व्यंजव्यकाः वर्णाः'।**

मम्मटेन चोक्तम् –

**वर्णाः समासो रचना तेषां व्यंजव्यकतामिताः।**

अर्थाद् ये माधुर्यौजः प्रसादारख्यास्त्रयो गुणवृत्त्या, उपचारेण शब्दगुणाः प्रोक्ताः तेषां गुणानां व्यंजकतां वर्णादयः, इता गताः प्राप्ताः। वर्णाः, अक्षराणि, समासो बहूनामेकपदता। रचना पदसंटना (पदानां पौर्वापर्यरूपा, आनुपूर्वी)। वर्णा इति बहुवचनमेकद्वित्रिवर्णानामव्यंजकत्वसूचनायेति। समासादीनां

सर्वेषां व्यंगजकानां वर्णमूलकत्वात् कर्णपूरेण वर्णा इत्युक्तम्, स्पष्टार्थ तु मम्मटेन सर्वेषां गणना कृता। अतएव पुनः कर्णपूरः कथयति–

**व्यंजकाः स्युर्वर्णाश्च रचना अपि।**

तत्र वर्णानां व्यंजकत्वं दर्शयति। तत्र माधुर्यव्यंजकाः वर्णाः, यथा–

**स्पर्शाः स्वपंचमाधः स्था अटवर्गा लघुरणौ।**

**माधुर्यव्यंजका वर्णा नैकीरूपा क्रमेण चेत्।।**[5]

कादयो मकारपर्यन्ता वर्णाः स्पर्शाः कथ्यन्ते। तत्र स्वस्य कवर्गस्य पंचमङकारस्तस्याधस्था ङ्क ङ्ख ङ्ग वर्णा माधुर्यव्यंजकाः, भवन्ति। एवं चवगादावपि ज्ञेयम्। अटवर्गा इति टवर्गास्तु सर्वथैव न माधुर्यव्यंजकः रणौ रेफणकारौ लघु एव माधुर्यव्यंजकौ। यदि ते पंचमाधःस्थवर्णा एकरूप न भवन्ति? तदा माधुर्यव्यंजकाः यदि च एकस्मिनेव काव्ये ङ्क ङ्ख ङ्गादिसजातीयवर्णनां धारा वाहिकतया निवेशश्चेत्त दोष एव, तदुदाहरे व्यक्तीभविष्यति ।तस्मात् पृथग्वर्णजा एवं पंचमाधस्थसंयुक्ता वर्णा ग्राह्यः, न त्वेकवर्गजाः। मम्मटेनाप्युक्तम्–

**मूर्ध्नि वर्गान्त्यगा स्पर्शा अटवर्गा रणौ लघू।**

**अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा।।**[6]

**ओजोव्यंजकाः वर्णा**

एवं माधुर्यगुणव्यंजकान निरूप्य सम्प्रति ओजोगुणव्यंजकान्याह–

**योग आद्यतृतीयाभ्यां चेद् द्वितीयचतुर्थयोः।**

**उपर्य्यधो द्वयोर्वापि रेफेण सह चेद् युतिः।।**

**शेषौ टवश्चानन्त्यो वृत्तिदैर्ध्य तथौजसि।।**[7]

आद्येनाक्षरेण द्वितीयाक्षरस्य योग, एवं तृतीयाक्षरेण चतुर्थाक्षरस्य योगः, रेफेण सह वर्णस्योपरि युतिर्योगः, यथार्कः, तथा वर्णास्याधोयोगे यथा शक्रः। उपरि आधोदेशे च योगे रेफेण

सह यथा दुर्ग्रहः। अकारसहित एव टठादयो वर्णा ओजोव्यंजकाः, न तु अकाररहिता रूट् रूड् इति वर्णाः। उदाहरणेन स्पष्टयति–

**ऊर्ध्वोर्ध्व सर्वमूर्ध्नां मुकुटतटलुण्ठद्रत्नदीप्तिछटाभि–**

**श्छन्नं यत् पादपीठं प्रकटितपटिमप्रौढिगभर्महोभिः।**

**शर्वादेर्गर्वखर्वी करणचलभुजादण्डशौटीर्यचण्डः**

**शिष्टाभीष्टं कृषीष्टप्रचुरघनघृणा विक्रमचक्रपाणिः।।**

एष मध्यम ओजोव्यंजकाः वर्णाःमध्यमत्वं लक्षयति–

**अटवर्गैररेफैश्च कखग्घाभ्यांच विवर्जितैः।**

**अयुक्तैश्च महाप्राणैर्मध्यतां प्रतिपद्यते।।**[8]

मम्मटेनोजोगुणव्यंजकाः वर्णा प्रोक्ताः, यथा–

**योग आद्यतृतीयाभ्याभ्यामन्त्ययो रेण तुल्ययोः।**

**टादिः शषौ वृत्तिदैर्ध्यं गुम्फ उद्धत ओजसि।।**[9]

एष विकटवर्णघटित एव ओजोऽतिशयव्यंजकः, तस्योजोगुणस्य रौद्रवीरवीभत्सेषुः स्थितिः।

**प्रसादगुणव्यंजकमाह–**

**प्रसादस्य व्यंजिका तु केवलं रचना मता।**

**न तत्र वर्णप्राधान्यं प्रसादो विशदार्थता।।**[10]

विशदार्थता कष्टं बिना अर्थबोधकता। प्रसादस्य सर्वेष्वेव रसेषु युक्तत्वान्न वर्णगतनियमः, तस्य व्यंजिका रचना एव। यथोक्तं मम्मेट–

**श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्।**

**साधारणः समग्राणां स प्रसादो गुणो मतः।।**[11]

प्रसादस्य व्यंजकत्वमुदाहरति कविकर्णपूरगोस्वामी–

**कोपे यथाभिलषितं न तथा प्रसादे**

**वक्तुं विधे सततमातनुमानसस्याः।**

**इत्याकलय्य दयितस्य वचोविभंगी**

**राधाविवर्तितविनम्रमुखी बभूव।।**[12]

अन्त्रान्वयप्रतियोगिनां यथास्थानमवस्थितेर्झटित्येवान्वयबोधात् प्रसादः। नन्वेवं माधुर्यादावुद्धतादयो रचनाद्याः सर्वत्र विरूद्धाः, स्युरित्यत प्रतिप्रसवमाह–

यद्यपि गुणपरतन्त्रा गुणव्यंजकत्वनियताः। रचनादयः, आदिपदाद् वर्णसमासौ ज्ञेयौ। तदपि वक्त्रादे औचित्यात्तदधीना, भवन्ति, तस्माद् गुणोऽपि तदधीनः।

**अत एवोक्तं मम्मेटन–**

**वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित्क्वचित्।**

**रचनावृत्तिवर्णानामन्यथात्वमपीष्यते।।**[13]

एवं गुणव्यंजकत्वनियम औत्सर्गिकः, वक्त्राद्यौचित्येन क्वचिद्बाधात् तद्भिन्नस्थले एव च गुणव्यंजकत्वनियम इति भावः।

**गुणानां भेदः**

गुणानां सामान्यलक्षयानन्तरं विशेषलक्षणनिर्वक्तव्ये तत्सौकर्याय तद्भेदान् वक्ति कविकर्णपूरः–

**माधुर्यमपि चौजश्च प्रसादश्चेति ते त्रयः।**

**केचिद्देशेति ब्रूवत एष्वेवान्तर्भवन्ति ते।।**[14]

ते गुणा माधुर्यौजः प्रसादाख्याः, त्रय एव! त्रय इत्यनेनाधिकसंख्याव्यवच्छेदः। व्यवच्छेद्यमेवाह– **केचिदिति।** केचिद् वामानादयः दश गुणान् स्वीकुर्वन्ति।

तद्यथा–

**श्लेषः प्रसादः समता माधुर्यं सुकुमारता।**

**अर्थव्यक्तिरूदारत्वमोजः कान्तिसमाधयः।।**

**इति वैदर्भमार्गस्य प्राणा दश गुणा मताः।**

इति वामनोक्ता दश शब्दगुणाः, अर्थगुणाश्च न। यतः सामाजिकानां नवरसजन्यास्तिस्रोऽवस्थाः। द्रुतिर्विस्तारो विकासश्चेति। तत्र श्रृंगारकरूणशान्तेभ्यो द्रुतिश्चितस्य, वीररौद्रवीभत्सेभ्यो विस्तारस्तस्य, हास्याद्भूतभयानकेभ्यो विकास इति। विकासश्च हास्ये, अद्भुते नयनस्य, भयानके द्रुतापसरणारूपो गमनस्य। सः च क्वचिद् द्रुत्वा, क्वचिद् विस्तारेण च युक्तः, विभाववैचित्र्यात्। प्रसादस्तु सर्वेषामाधिक्यकारीत्यवस्थात्रयरूपकार्यवैचित्र्यनियामकता कारणत्रयमेव कल्प्यते कारणवैचित्र्ययेन त्रयाणामेव स्फुटमुपलम्भाद् अवान्तरगुणानामङ्गङ्गीभाववैचित्र्येणा–

नन्त्त्यादस्फुटत्वाच्च।

कविकर्णपूरेण परमतसिद्धानां शेषसप्तगुणानां लक्षणमपि कृतं परन्तु नोदाहृतम्। वामनादिभिरूक्ताः श्लेषादयोऽपि गुणाः, दुरपह्नवाः, तत्कुतस्त्रय एव न पुनर्दशेति तेषामन्तर्भावादिरूपसमाधानं प्रस्तौति–

**तेष्वेवान्तर्भवन्त्येक एके वैचित्र्यबोधकाः।**

**एके दोषपरित्यागाद् गतार्था इति नो दश।।**

ये दश गुणः, ते त्रिधा व्यवतिष्ठन्ते, केचिद् गुणाः, एषु मदुक्तलक्षणेषु माधुर्यादिष्वन्तर्भवन्ति अन्तर्भूता भवन्ति, एतल्लक्षणक्रोडीकृतत्वाद् इति शेषः। एके इतरे केचित दोषत्यागाद् दोषाभावरूपत्वाद् दोषाभावव्यापकत्वाद्वा अंगीकृताः। एके अपरे केचित् वैचित्र्यबोधकाः सन्ति। तस्मान्न दश गुणाः किं तु त्रय एव। यथोक्तम्–

**अर्थव्यक्तिः प्रसादान्तः प्रौढ़िवैचित्र्यबोधिका।**

**समता तु क्वचिद् दोषः वैषम्यं यत्र वांछयते।।**

**सजातीयविजातीययुगपद् वर्णने सति।**

**ग्राम्यकष्टत्वादिहानादपारूष्योररीकृतौ।।**

**औज्ज्वल्यरूपा या कान्तिः सा माधुर्यान्तरस्थितताः।**

**अन्ये त्वोजसि वर्तन्ते तेन ते न पुनर्दश।।**[15]

अन्ये श्लेषसमाध्युदारता ओजस्येवान्तर्भवन्तोत्यर्थः।

नन्वेवं चेत् सप्तानां गुणानामपि माधुर्यादिष्वन्तर्भावो न सम्भवति तेषामपि पृथक–पृथक व्यवहारद्वारा वर्तन्ते एवेत्यत आह– किश्च मतान्तरकथनमेवैतत् तेन दशविधत्वं न दुष्टमित्युभयमेवास्माकमभीष्टम्, उभयमिति त्रिविधत्वं सप्तं (दश) विधत्वभित्युभयमित्यर्थः।

ते त्रयः माधुर्यादय के किं स्वरूपा इत्यादाकाङ्क्षायां तेषा त्रयाणां गुणानां लक्षणं प्रतिपादयति।

**तत्र माधुर्यस्य लक्षणम्–**

रंजकत्वं हि माधुर्य चेतसो द्रुतिकारणम्।

सम्भोगे विप्रलम्भे च तदेवातिशयोचित्।

रसनिष्ठमाधुर्य रंजकत्वम्, तदेव किमित्यपेक्षायामाह–चेतसो द्रुतिकारणम्। तथा च द्रुतिकारणं रंजकत्वमाहतादकत्वं वा माधुर्यम्, तत्व श्रृंगारे। चकारात् करूणादौच। तोलनीयं मम्मटभदृस्य माधुर्यलक्षणेन–

**आहलादकत्वं माधुर्यं श्रृंगारे द्रुतिकारणम्।**

**करूणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्।।**[16]

भामहस्तु श्रव्यत्वं माधुर्यस्य लक्षणमाह स्म।

**अथौ ओजसः लक्षणम्**

**चेतो विस्ताररूपस्य दीप्तत्वस्य हि कारणम्।**

**ओजः स्याद् वीरवीभत्सरौद्रेषु क्रमपुष्टिकृत्।।**

क्रमपुष्टिकृदित्यस्य क्रमादित्यर्थः। चितस्य विस्ताररूपस्य दीप्तत्वास्य हेतुः ओजः। दीप्तिस्वरूपा या मनसो चितस्य वा विस्तृतिज्वलितमिव। तथा च यद्धशात् ज्वलितमिव मनो जायते तदोजः । वीरवीभत्सरौद्रेषु ओजोगुणस्य क्रमात् स्थितिरवस्थानं भवति। वीराद्वीभत्से तताऽपि रौद्रे चित्तदीप्तेः। कार्याया सातिशयतया कारणमोजः क्रमेणोत्कर्षवदित्यर्थः। स्निग्धस्यापि सामाजिकचित्तस्य द्वेष्यविषयसक्पर्केण दीप्तत्वमुष्णता जायते। तत्र वीरस्य द्वेष्यनिग्रहे जिगीषामात्रम्।

वीभत्से तु जुगुप्सितविषयेऽत्यन्तं त्यागेच्छा। रौद्रे त्वपकारिण वधादिकः प्रयास इति क्रमेण दीप्त्याधिक्यं बोध्यम्। तत्र मम्मटस्य लक्षणमवलोकयस्तु–

**दीप्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।**

**वीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च।।**[17]

**ततः प्रसादस्य लक्षणम्**

प्रसादं लक्षयति कविकर्णपूरगोस्वामी–

**श्रुतिमात्रेण यत्रार्थः सहसैव प्रकाशते।**

**सौरभ्यादिव कस्तूरी प्रसादः सोऽभिधीयते।।**[18]

यथा कस्तूरीगन्धो वस्त्रादिभिरावृतोऽपि कस्तूरीं प्रकाशयति, तद्वत् श्रृतिमात्रेण यत्र सहसैवार्थस्य प्रकाशनं भवति तत्र प्रसादगुणस्य स्थितिः सः प्रसादः सर्वेषु रसेष्वेव, सर्वास्वपि न रीतिषु उपयुक्तो भवति। मम्मटभट्टस्य लक्षणमवलोक्यन्तु–

**शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः।**

**व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहिता स्थितिः।।**

अग्निर्यथा शुष्कमिन्धनं काष्ठं सहसैव इटित्येव व्याप्नोति, आद्रेन्धनेऽग्नेरप्रसरात्, जलं यथा स्वच्छं पटं सहसैव प्रसरति, मलिनपटे जलस्याप्रसारात्, तद्वद् यः गुणः अन्यद् व्याप्यं चितं सहसैव व्याप्नोति असौ प्रसादारख्यः स्वच्छतारूपो (विकासरूपो) गुणः यदा वीररौद्रादिषु चित्तं व्याप्नोति तदा शुष्केन्धनाग्निवदिति, यदा श्रृंगारकरूणादिषु तदा स्वच्छजलवदिति बोध्यम्।

येन गुणेन रसाः सहसैव चित्तं व्याप्नुवन्ति स प्रसाद इति फलितोऽर्थः। एवं च माधुर्यादीनां त्रयाणां गुणानां क्रमेण द्रुतिदीप्तिविकासाख्यतिस्रश्चितवृत्तयः कार्या इति कथितम्।

पण्डितराजजगन्नाथो गुणान् साक्षादेव शब्दार्थरसरचनाश्रितान् निरूपयाश्चक्रे। तत्रायमभिसन्धिः द्रुतिदीप्तिविकासारख्याचित्तवृत्तीनां साक्षाज्जनिका तु तत्तद् गुणविशिष्टरसचर्वणैव। परं गुणस्तासां प्रयोजकाः सन्ति, न जनकाः। तथा हि माधुर्यविशिष्टकरूणशान्तश्रृंगाररसचर्वणाजन्यायाश्चित्तद्रुतेः

प्रयोजकं माधुर्यम्। एवमोजोगुणविशिष्टवीरवीभत्सरौद्ररसचर्वणां जन्याया दीप्तेः प्रयोजकमोजः। तथा प्रसादगुणविशिष्टाद्भुतहास्भयानकानां सर्वरसानां च चर्वणाजन्यस्य विकासस्य प्रयोजकः प्रसादगुण इति।

इत्थं गुणा रसमात्रधर्माः सन्ति, **'मधुरा रचना' 'ओजस्वी बन्धः'** इत्यादिव्यवहारस्तु 'आकारोऽस्य शूरः' इति व्यवहारवदौपचारिकः (भाक्तः) निश्चितो भवति।

## सन्दर्भ सूची


1. काव्यप्रकाश
2. काव्यालंकार सूत्र– 3.1
3. काव्यादर्श– 1.42
4. अंलकार कौस्तुभ पृष्ठ 267
5. अंलकार कौस्तुभ 6.22
6. काव्यप्रकाश 8.74
7. अंलकार कौस्तुभ – 6.27–28
8. अंलकार कौस्तुभ 6.30
9. काव्यप्रकाश 8.75
10. अंलकार कौस्तुभ 6.34
11. काव्यप्रकाश 8.76
12. अंलकार कौस्तुभ 6.35
13. काव्यप्रकाश 8.77
14. अंलकार कौस्तुभ 6.6
15. अंलकार कौस्तुभ पृष्ठ 364–65
16. काव्यप्रकाश 8–67.68
17. काव्यप्रकाश 8–69.70
18. अंलकार कौस्तुभ पृष्ठ– 266